**CLASS : 10th (Secondary)** **Code No. 2808**

**Series : Sec. M/2016**

*रोल नं०* | | | | | | | | | | |

***SET : B***

# संस्कृत

*(Academic)*

2nd Semester

(Only for Fresh/Re-appear Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : 2½ घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **11** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देश :*** *(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित - अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

एतत् विज्ञानस्य युगम् अस्ति। जीवनस्य विविधेषु क्षेत्रेषु वयं विज्ञानस्य चमत्कारान् पश्यामः। आवश्यकता आविष्कारस्य जननी अस्ति। वायुयानस्य आविष्कारेण अद्य वयं अल्पसमये एव विश्वस्य कस्यापि देशस्य यात्रां कर्तुं शक्नुमः। दूरदर्शनस्य आविष्कारेण विश्वस्य कस्यापि स्थानस्य घटनायाः अवलोकनं कर्तुं शक्नुमः। अद्य चिकित्सकाः असाध्यरोगाणां चिकित्सां कर्तुं समर्थाः सन्ति।

(क) का आविष्कारस्य जननी अस्ति ?

(ख) एतत् कस्य युगम् अस्ति ?

(ग) चिकित्सकाः केषां चिकित्सां कर्तुं समर्थाः सन्ति ?

(घ) वयं केन विश्वस्य यात्रां कर्तुं शक्नुमः ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

## खण्डः 'ख'
## (रचनात्मक - लेखनम्)

**2.** (क) भवान् ईशानः। स्व-अध्ययनस्य प्रगतिविषये मातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखित : $5 \times 1 = 5$

परीक्षाभवनम्
तिथिः

पूज्ये (i) .................,

सादरं प्रणामः।

अत्र कुशलं तत्रास्तु। अहं मनोयोगेन (ii) .................। अहं (iii) ................. प्रातः पञ्चवादने उत्तिष्ठामि। ततः दैनिककृत्यं कृत्वा पठितानां पाठानाम् (iv) ................. करोमि। संस्कृतविषये मया (v) ................. स्थानं प्राप्तम्। पितृचरणयोः मम प्रणामाः।

भवत्याः पुत्रः
ईशानः

**मञ्जूषा**

| आवृत्तिम् , प्रथमम् , मातः, प्रतिदिनं, पठामि। |
|---|

(ख) चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – $5 \times 1 = 5$



(i) इदं चित्रं ................ अस्ति।

(ii) चित्रे एकं .................. अपि दृश्यते।

(iii) छात्राः .................. क्रीडन्ति।

(iv) अस्मिन् चित्रे .................. अपि अस्ति।

(v) बालकाः ................. अपि खेलन्ति।

**मञ्जूषा**

| क्रीडाशिक्षकः, क्रिकेटक्रीडाम् , क्रीडाक्षेत्रस्य, भवनम् , कन्दुकेन। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम जननी' इति विषयम् अधिकृत्य पञ्च-वाक्यानि संस्कृतभाषायां लिखत।

## खण्डः 'ग'

## (अनुप्रयुक्त - व्याकरणम्)

**3.** (क) 'दीर्घसन्धेः' अथवा 'विसर्गसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) 'तत्पुरुषसमासस्य' अथवा 'द्वन्द्वसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

## खण्डः 'घ'

## (पठित - अवबोधनम्)

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) राजा तं मुनिं प्रश्नत्रयमपृच्छत् – कः समयः श्रेष्ठः ? कः पुरुषः श्रेष्ठः ? किं कर्म च श्रेष्ठम् ? इति। मुनिस्तु राजानं प्रति न ध्यात्वा स्वकार्यमेवाकरोत्।

**अथवा**

(ख) चाणक्यः – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः। किं कियत् च अस्मज्जनादिष्यते इति।

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

**अथवा**

(ख) दुष्कराणि-अपि कर्माणि मतिवैभवशालिनः।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

**6.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – $5 \times 2 = 10$

तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन्।

(क) अतिथिः केन प्रबुद्धः ?

(ख) गृहाभ्यन्तरं कः प्रविष्टः ?

(ग) चौरः काम् आदाय पलायितः ?

(घ) के स्वगृहाद् निष्क्रम्य तत्रागच्छन् ?

(ङ) 'चौरोऽयं चौरोऽयम्' इति क्रोशितुं कः आरभत ?

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $3 \times 2 = 6$

आपेदिरेऽम्बरपथं परितः पतङ्गाः,
भृङ्गा रसालमुकुलानि समाश्रयन्ते।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो,
मीनो नु हन्त कतमां गतिमभ्युपैतु।।

(क) सङ्कोचं किम् अञ्चति ?

(ख) अम्बरपथं के आपेदिरे ?

(ग) भृङ्गाः कानि समाश्रयन्ते ?

**8.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं लिखत – 2 × 2½ = 5

(क) प्रायो दरिद्रशिशवः परमन्दिराणाम्।

(ख) नैच्छद् दरिद्रगृहिणी रजनीविरामम्।

(ग) प्राणेभ्योऽपि प्रियः सुहृद्।

**9.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 5 × 1 = 5

(क) उभौ शवं चत्वरे स्थापितवन्तौ।

(ख) शिशुजनस्य अद्य अशनं जातम्।

(ग) चातकः वने वसति।

(घ) तृणानाम् अग्निना सह विरोधो भवति।

(ङ) एतादृशी भयावहघटना गढवालक्षेत्रे घटिता।

**10.** प्रश्नपत्रे लिखितं श्लोकं विहाय 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत। 4

## खण्डः 'ङ'

## (बहुविकल्पीय - प्रश्नाः)

**11.** अधोलिखितप्रश्नानां प्रदत्तचतुर्षु वैकल्पिक-उत्तरेषु उचितमुत्तरं विचित्य लिखित – 16 × 1 = 16

(क) 'किञ्च' इति पदे कः सन्धिविच्छेदः ?

(i) किम् + च (ii) कि + च

(iii) कञ् + च (iv) कश्‍ + च

(ख) 'यथा + इष्टम्' अत्र सन्धियुक्तपदम् –

(i) यथाष्टम् (ii) यथेष्टम्

(iii) यथाम् (iv) यथेव

(ग) 'शस्त्राहतः' इति पदस्य विग्रहपदम् –

(i) शस्त्र आहतः (ii) शस्त्र हतः

(iii) शस्त्रणा हत (iv) शस्त्रेण आहतः

(घ) 'पीतपङ्कजम्' इति पदे कः समासः –

(i) तत्पुरुषः (ii) द्विगुः

(iii) कर्मधारयः (iv) नञ्तत्पुरुषः

(ङ) 'प्रति' इति उपपदस्य योगे का विभक्तिः भवति ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(च) 'तरु' शब्दस्य षष्ठ्यैकवचने किं रूपम् ?

(i) तरोः (ii) तरवे

(iii) तरुणा (iv) तरुम्

(छ) 'अगच्छत्' इति पदे कः लकारः ?

(i) लोट्लकारः (ii) लङ्लकारः

(iii) लट्लकारः (iv) लृट्लकारः

(ज) 'शोचति' इति पदे का धातुः ?

(i) शच् (ii) शाच्

(iii) शुच् (iv) शञ्च्

(झ) 'नियुक्तः' इति पदे कः प्रत्ययः ?

(i) क्तवा (ii) तुमुन्

(iii) ल्यप् (iv) क्त

(ञ) 'पठ् + अनीयर्' इति संयोगे किं रूपम् ?

(i) पठनीयः (ii) पठित्वा

(iii) पठितः (iv) पठितवान्

(ट) राजा आश्रमे मुनेः ............ अगच्छत्।
(रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) पार्श्वम् (ii) राज्ञः
(iii) राज्ञि (iv) राजानम्

(ठ) 'सिंहः उच्चैः गर्जति' अत्र अव्ययपदं किम् ?

(i) सिंहः (ii) गर्जति
(iii) उच्चैः (iv) गर्ज्

(ड) 'पञ्चपञ्चाशत्' इति पदे का संख्या ?

(i) 35 (ii) 45
(iii) 55 (iv) 65

(ढ) 'विशीर्णाः' इति पदस्य किं समानार्थकपदम् ?

(i) नष्टाः (ii) क्रोधः
(iii) सत्यः (iv) द्वेषः

(ण) 'श्रेष्ठम् कर्म' अत्र विशेषणपदम् किम् ?

(i) श्रेषः (ii) कर्म
(iii) श्रेष्ठम् (iv) करः

(त) 'विचित्रा दैवगतिः' अत्र विशेष्यपदं किम् ?

(i) वि (ii) चित्रा
(iii) विचित्रा (iv) दैवगतिः